दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-114 | 1 | फरवरी 14, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णद्वादशी
फाल्गुण 02 प्रविष्टांशः मङ्गलमयः भवेत्

2 संसदस्य बजट-सत्रस्य प्रथमचरणस्य समापनम्,बजट-सत्रस्य प्रथमः चरणः सम्पन्नः, मार्च-मासस्य नवमे दिनाङ्के पुनः भविष्यति उभयोः सदनयोः उपवेशनम्

3 द्वाविंशति-दिनानन्तरं सर्वेषां वाहनानां कृते अटल- सुरङ्ग- रोहताङ्गमार्गः सुचारुः, हिमच्छादितासु उपत्यकासु पर्यटकाणां सम्मर्दः

6 सरोजिनीनायडूमहोदयायाः व्यक्तित्वं कृतित्वं च (जयंतीविशेषः)




## भारते AI इत्यस्य प्रभाव-शिखरसम्मेलनम् भविष्यति

**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः** ।भारते फरवरी-मासस्य १६ दिनाङ्कतः २० दिनाङ्कपर्यन्तं आयोज्यमाने 'इंडिया-एआई इम्पैक्ट' (India-AI Impact) शिखरसम्मेलने विंशतिदेशानां नेतारः भागं ग्रहीष्यन्ति।

### मुख्यातिथयः

फ्रांस-देशस्य राष्ट्रपतिः इमैनुएल मैक्रों ब्राजील-देशस्य राष्ट्रपतिः लुइज़ इनासियो लूला दा सिल्वा,स्पेन-देशस्य राष्ट्रपतिः पेड्रो सांचेज पेरेज़-कास्टेजोन स्विट्ज़रलैंड-देशस्य राष्ट्रपतिः गाय पार्मेलिन,नीदरलैंड्स-देशस्य प्रधानमन्त्री डिक शूफ़,संयुक्त अरब अमीरात (UAE) देशस्य अबू धाबी इत्यस्य क्राउन प्रिंस शेख खालिद बिन मोहम्मद बिन जायद अल नाहयान,मॉरीशस-देशस्य प्रधानमन्त्री डॉ. नवीनचंद्र रामगुलाम श्रीलंका-देशस्य राष्ट्रपतिः अनुरा कुमार दिसानायके, सेशेल्स-देशस्य उपराष्ट्रपतिः सेबेस्टियन पिल्ले भूटान-देशस्य प्रधानमन्त्री शेरिंग तोबगे च मुख्यातिथयः भविष्यन्ति ।

### अन्ये प्रतिभागिनः

विदेशमन्त्रालयेन एकेन वक्तव्येन सूचितं यत् बोलीविया, क्रोएशिया, एस्टोनिया, फिनलैंड, ग्रीस, गुयाना, कजाकिस्तान, लिकटेंस्टीन, सर्बिया, स्लोवाकिया च इत्येतेषां देशानां नेतारः अपि अस्मिन् शिखरसम्मेलने उपस्थिताः भविष्यन्ति।

> **विशेषम्** - अस्मिन् सम्मेलने ४५ तः अधिकदेशानां मन्त्रिस्तरीयाः प्रतिनिधयः सम्मिलिताः भविष्यन्ति। अपि च, संयुक्तराष्ट्रसङ्घस्य महासचिवः अनेकेषाम् अन्ताराष्ट्रियसंस्थानां वरिष्ठाधिकारिणः च अस्मिन् विचार-विमर्शे भागं ग्रहीष्यन्ति।

# प्रधानमन्त्रिणा देहल्यां सेवातीर्थ-परिसरस्य कृतम् उद्घाटनम्, नागरिकः देवो भव



**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् 'सेवा तीर्थम्' तथा 'कर्तव्य भवनम्' च देशस्य जनानाम् आकांक्षाः पूरयितुं निर्मितम् अस्ति। सः अकथयत् यत् 'सेवा तीर्थम्', 'कर्तव्य भवनम्-१', 'कर्तव्य भवनम्-२' च विकसितभारतस्य यात्रायां प्रमुखाः सोपानाः सन्ति। नवदिल्ल्यां सायं सेवा-तीर्थ-परिसरे एकां सभां सम्बोधयन् श्रीमोदी अवदत् यत् एतानि भवनानि 'नागरिक-केन्द्रित-शासनम्' देशस्य प्रगत्यै सर्वकारस्य प्रतिबद्धतां च दर्शयन्ति। सः बलम् अददात् यत् अत्र गृहीताः निर्णयाः कस्यचित् राज्ञः विचारधारां न, अपितु १४० कोटि-नागरिकाणाम् आशाः अग्रे नेतुं आधारशिला भविष्यन्ति।स्वातन्त्र्यात् परं देशस्य कृते अनेकाः महत्त्वपूर्णाः निर्णयाः नीतयः च 'साउथ ब्लॉक', 'नॉर्थ ब्लॉक' सदृशभवनैः कृताः। प्रधानमन्त्री अवदत् यत् एतानि भवनानि ब्रिटिश-साम्राज्यस्य प्रतीकरूपेण निर्मितानि आसन्, येषाम् उद्देश्यं भारतं शताब्दः यावत् दासतायां बद्धम् आसीत्। सः अकथयत् यत् यथा यथा वयं विकसितभारतं प्रति गच्छामः, तथा तथा अनिवार्यम् अस्ति यत् भारतं औपनिवेशिक-चिन्तनस्य सर्वान् अवशेषान् त्यजाम।प्रधानमन्त्रिणा उक्तं यत् २१ तमायाः शताब्द्याः प्रथमः पादः समाप्तः अस्ति। अतः विकसितभारतस्य परिकल्पना केवलं नीतिषु योजनासु च न, अपितु कार्यस्थलेषु कार्यालयेषु च अपि दृश्येत्। सः उल्लिखितवान् यत् यतः देशः संचाल्यते, तत् स्थानं प्रभावशाली, कार्यक्षमम्, उत्साहवर्धकं च भवेत्।श्रीमोदी अवदत् यत् स्वातन्त्र्यस्य दशकानि परम् अपि भारतसर्वकारस्य अनेके मन्त्रालयाः दिल्ल्यां ५० तः अधिकेषु पृथक् स्थानेषु कार्यं कुर्वन्ति स्म। एतेषां भवनानां भाटके प्रतिवर्षं १५०० कोटि-रुप्यकाणि व्ययीक्रियन्ते स्म। अपि च, प्रतिदिनं ८ तः १० सहस्र-कर्मचारिणां गमनागमनेन 'लॉजिस्टिक्स' व्ययः अपि भवति स्म। सेवा-तीर्थस्य कर्तव्य-भवनस्य च निर्माणेन एते व्ययाः न्यूनाः भविष्यन्ति, कर्मचारिणां समयस्य च रक्षणं भविष्यति। सः अवदत् यत् 'सेवा तीर्थम्' केवलं नाम न, अपितु एकः संकल्पः अस्ति। एतत् नागरिकाणां सेवया सह पवित्रं स्थानं तथा सेवायाः प्रतिज्ञापूर्तेः स्थलमस्ति। 'रेस कोर्स रोड' इत्यस्य नाम परिवर्तयितुं 'लोक कल्याण मार्गः' इति कृतम्, एतत् केवलं नामपरिवर्तनं नास्ति, अपितु सत्तायाः चिन्तनं सेवाभावे परिवर्तयितुं प्रयासः अस्ति।

प्रधानमन्त्री अवदत् यत् यथा यथा भारतं 'रिफॉर्म एक्सप्रेस' इत्यस्मिन् आरुह्य अन्ताराष्ट्रिय-सम्बन्धेषु नूतनम् अध्यायम् आलिखति, व्यापार-सन्धिभिः नूतन-द्वाराणि उद्घाटयति, तथा तथा 'सेवा तीर्थे' 'कर्तव्य भवने' च कार्यस्य नूतना गतिः, आत्मविश्वासः च राष्ट्रस्य लक्ष्याणां प्राप्तौ महतीं भूमिकां निर्वक्ष्यति।सः अकथयत् यत् गतैकादश-वर्षेषु शासनस्य नूतनः प्रतिमानः (Model) प्रकटीभूतः, यत्र नागरिकाः निर्णयप्रक्रियायाः केन्द्रे सन्ति। "नागरिक देवो भव" केवलं सूक्तिः न, अपितु कार्यसंस्कृतिः अस्ति। अधिकारिभिः एतेषु नूतनभवनेषु प्रवेशसमये एषा एव संस्कृतिः स्वीकरणीया। श्रीमोदी उद्घोषितवान् यत् सेवा-तीर्थे गृहीतः प्रत्येकं निर्णयः, प्रेषिता प्रत्येका सञ्चिका (File), व्यतीतः प्रत्येकः क्षणः च १४० कोटि-नागरिकाणां जीवनं सुखमयं कर्तुं भवेत्।अस्मिन् अवसरे श्रीमोदी 'सेवा तीर्थ' स्मारक-मुद्रां (Coin) डाक-पत्रकं (Stamp) च विमोचितवान्।

## सुभाषितम्

**उपकर्तुं यथा स्वल्पं,**
**समर्थो न तथा महान्।**
**प्रायः कूपस्तृषां हन्ति,**
**सततं न तु वारिधिः।।**
**-महासुभषितसंग्रह**

जिस प्रकार एक साधारण व्यक्ति अन्य व्यक्तियों का उपकार करने में समर्थ होता है एक महान व्यक्ति उस प्रकार समर्थ नहीं हो सकता है। जैसे एक साधारण कुंआ निरन्तर लोगों की प्यास बुझाता है न कि विशाल समुद्र।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रधानमन्त्री मोदी-तारिक रहमानयोः सम्भाषणम्

**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः** ।प्रधानमन्त्री नरेन्द्रमोदी महोदयेन बाङ्गलादेश-राष्ट्रवादी-दलस्य (BNP) अध्यक्षेण तारिक रहमान महोदयेन सह दूरभाषेण वार्तालापः कृतः। अस्मिन् अवसरे सः बाङ्गलादेशस्य निर्वाचनेषु प्राप्तस्य गौरवपूर्णविजयस्य निमित्तं तस्मै वर्धापनानि दत्तवान्। सामाजिक-सञ्चार-माध्यमेन (Social Media) श्रीमोदी उक्तवान् यत् बाङ्गलादेशस्य जनानां आकाङ्क्षाः पूरयितुं सः श्रीरहमानस्य प्रयासेषु स्वकीयाः शुभकामनाः समर्थनं च प्रकटितवान्। प्रधानमन्त्रिणा प्रतिपादितं यत् उभौ निकटवर्तिनौ प्रतिवेशिदेशौ ऐतिहासिक-सांस्कृतिक-सम्बन्धैः सम्बद्धौ स्तः। सः उभयोः देशयोः नागरिकाणां शान्तेः कामनां कृतवान्

# संसदस्य बजट-सत्रस्य प्रथमचरणस्य समापनम्

## बजट-सत्रस्य प्रथमः चरणः सम्पन्नः, मार्च-मासस्य नवमे दिनाङ्के पुनः भविष्यति उभयोः सदनयोः उपवेशनम्



संसदः उभयोः सदनयोः कार्यप्रक्रिया स्थगिता अस्ति। अधुना बजट-सत्रस्य द्वितीयभागाय ९ मार्च दिनाङ्के पुनः मेलनं भविष्यति। बजट-सत्रस्य प्रथमः चरणः गतमासस्य २८ दिनाङ्के राष्ट्रपति द्रौपदी मुर्मू महोदयायाः उभयोः सदनयोः संयुक्त-अभिभाषणेन सह आरब्धः आसीत्। द्वि-चरणेषु आयोजितस्य अस्य बजट-सत्रस्य द्वितीयः भागः अस्मिन् वर्षे ९ मार्चतः २ एप्रिल पर्यन्तं चलिष्यति।

**लोकसभायाः वृत्तान्तः**:-लोकसभायां प्रथम-स्थगनात् परं यदा कार्यप्रक्रिया पुनः आरब्धा, तदा अनेकैः मन्त्रिभिः स्व-मन्त्रालयैः सम्बद्धाः अधिसूचना उपस्थापिताः। ततः परं पीठासीन-अधिकारिणी सन्ध्या राय सदनं स्थगितवती। तत्पूर्वं, सदनस्य आरम्भे पीठासीन-अधिकारिण्या भूतपूर्व-सांसदस्य भगवान दास राठौर महोदयस्य निधने शोकः प्रकटितः। दिवङ्गतस्य नेता महोदयस्य निधनं २१ जनवर्याम् अभवत्। सदनस्य सदस्यैः तस्य सम्मानार्थं मौनं च धृतम्। प्रश्नकालस्य समये स्वास्थ्यमन्त्री जेपी नड्डा महोदयः 'कोडीन' युक्त-कफ-सिरप (कफ-औषधम्) सेवनेन जात-मृत्यु-सम्बद्धस्य प्रश्नस्य उत्तरं दातुं प्रयतितवान्, परन्तु विपक्षस्य कोलाहलेन सः स्वकीयं उत्तरं पूर्णं कर्तुं न शक्तवान्। कांग्रेस-तृणमूल कांग्रेस-डीएमके इत्यादिदलानां सदस्याः सदनस्य मध्यभागं (Well) गत्वा घोषणां (Sloganeering) कृतवन्तः। मन्त्रिणा सदनस्य सुचारु-सञ्चालनाय प्रार्थना कृता, तथापि विपक्षस्य विरोधः निरन्तरं प्राचलत्। अस्य कोलाहलस्य कारणेन लोकसभायाः कार्यवाही मध्याह्ने १२ वादनपर्यन्तं स्थगिता।

**राज्यसभायाः वृत्तान्तः**: अपरपक्षे, राज्यसभायां शून्यकालः तथा प्रश्नकालः च सुचारुरूपेण सम्पन्नौ। प्रातः सदनस्य आरम्भे अनेकैः सदस्यैः स्व-दस्तावेजाः पटले स्थापिताः। राज्यसभायाः सभापतिः सी.पी. राधाकृष्णन् महोदयः राष्ट्रपति-महोदयायाः सन्देशं पठितवान्, यस्मिन् उक्तं यत् २८ जनवर्याम् उभयोः सदनयोः कृते दत्त-भाषणार्थं सदस्यानां 'धन्यवाद-प्रस्तावः' तया प्राप्तः अस्ति।

# RDG-विषये सर्वदलीयगोष्ठ्याः भाजपा- पक्षस्य बहिर्गमनम्

हिमसंस्कृतवार्ताः- शिमला। केन्द्रसर्वकारेण राजस्व-हानि-अनुदानं (RDG) स्थगितं कृतम् इति विषये राज्यसर्वकारेण शिमलायाः 'पीटरहॉफ' स्थाने आहूता सर्वदलीयगोष्ठी अतीव कोलाहलपूर्णा आसीत्। प्रायः होराद्वयं यावत् गोष्ठ्यां उपस्थिताः भूत्वापि विपक्षस्य नेता जयरामठाकुरः, भाजपा- प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः अन्ये च भाजपा- नेतारः मध्यमे एव गोष्ठीं विहाय प्रस्थिताः। भाजपा-पक्षस्य तर्कः आसीत् यत् सर्वकारः एकपक्षीयं दोषारोपणं करोति, भ्रामक-प्रस्तुत्या राजनैतिक- वृत्तान्तेन च वास्तविक-विषयेभ्यः ध्यानं भ्रामयति, यत् समस्यायाः समाधानं नास्ति।

## गोष्ठ्याः अन्तः किं जातम्?

मुख्यमन्त्री अवदत् यत् गोष्ठ्यां माकपा- बसपा-सहितैः अन्यदलैः अपि भागः गृहीतः। आरम्भे मन्त्री हर्षवर्धनः मुख्यविपक्षदलत्वात् भाजपा-पक्षं स्वकीयं पक्षं प्रथमं प्रस्तौतुं निवेदितवान्, परन्तु भाजपा-नेतृभिः अन्येषां दलानां परामर्शाः पूर्वं स्वीकर्तुम् आग्रहः कृततः।

१. राकेश सिङ्घा (CPIM) स्पष्टीकृतवान् यत् एषः विषयः कस्यापि सर्वकारस्य नास्ति, अपितु प्रदेशस्य संवैधानिक-अधिकारस्य अस्ति, यः १९५२ वर्षात् प्राप्यते।

२. राजीव बिन्दलः (BJP) यदा वक्तुं प्रारब्धवान्, तदा सः केन्द्रेण प्रदत्ताः 'फोरलेन'-मार्गयोजनाः, प्रधानमन्त्री- ग्राम- पथयोजनाः अन्याः च केन्द्रीययोजनाः गणयितुं प्रारब्धवान्। अस्मिन् मन्त्री हर्षवर्धनः तं मध्ये एव अवारयत्, आरडीजी (RDG) विषये स्थितिं स्पष्टं कर्तुं च उक्तवान्। मुख्यमन्त्री सूचितवान् यत् सामान्याः वार्ताः उक्त्वा भाजपा-नेतारः व्याजं (बहाना) कृत्वा बहिः गताः। जयराम ठाकुरः उक्तवान् यत् सः विधानसभायामेव स्वपक्षं स्थापयिष्यति।

**भाजपा-पक्षस्य निवेदनेन एव आहूता आसीत् गोष्ठी**

मुख्यमन्त्री रहस्योद्घाटनं कृतवान् यत् एषा सर्वदलीयगोष्ठी भाजपा-पक्षस्य कथनेन एव आहूता आसीत्, तेषामेव निवेदनेन च गोष्ठ्याः स्थानं सचिवालयात् परिवर्त्य 'पीटरहॉफ' इति कृतम्। मुख्यमन्त्री दुःखं प्रकटितवान् यत् भाजपानेतारः सर्वकारस्य पूर्णां योजनां श्रोतुं पूर्वमेव निर्गताः। सः अवदत् यत् सर्वकारस्य समीपे अस्मात् आर्थिकसङ्कटात् मुक्तिं प्राप्तुं योजना अस्ति, हिमाचलः च 'आत्मनिर्भरः' भविष्यति।

**शिष्टाचारं (प्रोटोकॉल) भङ्क्त्वापि सार्धं गन्तुं सिद्धः- मुख्यमन्त्री**

मुख्यमन्त्री उक्तवान् यत् प्रदेशहिताय सः शिष्टाचारं (Protocol) भङ्क्त्वापि भाजपा-नेतृभिः सह प्रधानमन्त्रिणं मेलितुं सिद्धः अस्ति। सः आरोपं कृतवान् यत् भाजपायाः 'आन्तरिक-लोकतन्त्रेण' नेतृणां वक्तुं शक्तिः समापिता, ते स्वपदात् भीताः सन्ति, अतः ते प्रधानमन्त्री-मोदी-महोदयस्य पुरतः आरडीजी-पुनरुद्धाराय अभ्यर्थनां कर्तुं साहसं न कुर्वन्ति। मुख्यमन्त्री अनुस्मारितवान् यत् प्राकृतिक-आपदाकाले अपि भाजपापक्षः विधानसभायाः बहिर्गमनं (Walkout) कृतवान् आसीत्।

# ट्राई (TRAI) इत्यनेन 'डीएनडी' तथा 'माईस्पीड' इति अनुप्रयोद्वयस्य नूतनं संस्करणं प्रारब्धम्




**हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।**

भारतीय दूरसंचार-विनियामक-प्राधिकरणेन (TRAI) नवदेहाल्यां 'ट्राई डू नॉट डिस्टर्ब (DND)' तथा 'ट्राई माईस्पीड (MySpeed)' इति मोबाइल-अनुप्रयोग-द्वयस्य नूतन-संस्करणं विमोचितम्। अस्य उद्देश्यं उपभोक्तृभ्यः अवांछित-सन्देशेभ्यः (Spam) मुक्तिं प्रदातुं तथा वास्तविक-समये नेटवर्क-प्रदर्शनस्य सम्यक् मापनं कर्तुं समर्थं करणमस्ति।

**उन्नत-तकनीकः** - ट्राई-अध्यक्षः अनिल कुमार लाहोटी अवदत् यत् एतौ उन्नत-कृतौ अनुप्रयोगौ-आधुनिक-तन्त्रज्ञानेन युक्तौ स्तः। अस्मिन् सरलं इंटरफेस, बहुभाषी-सुविधा, शीघ्रं पञ्जीकरणं तथा पारदर्शिनी प्रकिया अस्ति।

**उपभोक्तृ-सशक्तिकरणम्** - एतौ उपकरणौ प्रयोगकर्तृभ्यः सेवा-प्रदातृणां मूल्यांकनं कर्तुं, 'स्पैम' इत्यस्य सूचनां दातुं तथा सेवायाः गुणवत्तायाः संवर्धने प्रत्यक्ष-भूमिकां निर्वोढुं साहाय्यं करिष्यतः।

**आगामि-योजना** - 'माईकॉल' (MyCall) अनुप्रयोग-इत्यस्य नूतन-संस्करणं मार्च २०२६ तमे वर्षे प्रारप्स्यते।

**२०२५ वर्षस्य विवरणम्** - ट्राई-संस्थया उक्तं यत् २०२५ तमे वर्षे 'डीएनडी' अनुप्रयोग-माध्यमेन १७ लक्षाधिकः 'स्पैम'- इति पञ्जीकृताः, येन अनधिकृत-टेलीमार्केटर्स-विरुद्धं कठोरा कार्यवाही अभवत्।



# मासद्वयस्य यात्रायाः अनन्तरं धर्मशालां प्रत्यागतः तिब्बती-धर्मगुरुः दलाईलामा

हिमसंस्कृतवार्ताः- धर्मशाला।तिब्बतीनां सर्वोच्चः धर्मगुरुः महामहिम- दलाईलामा महोदयः दक्षिणभारतस्य द्वैमासिकीं (मासद्वयव्यापिनीं) यात्रां समाप्य पुनः स्वकीयं निवासस्थानं धर्मशालां प्रत्यागतवान्। धर्मगुरुः महामहिम- दलाईलामा प्रातःकाले 'इण्डिगो- विमानसेवायाः' (Indigo Airlines) विमानेन गग्गल- विमानपत्तनं (Kangra Airport) प्राप्तवान्। तत्र तस्य स्वागतार्थं शतशः तिब्बती- अनुयायिनः विदेशीयाः भक्ताश्च उपस्थिताः आसन्। सर्वे भक्ताः पारम्परिक-भेषभूषासु सज्जिताः भूत्वा अतीव श्रद्धापूर्वकं महामहिम्नः भव्यं स्वागतं कृतवन्तः। तदनन्तरम्, अतीव सुदृढ- सुरक्षा-व्यवस्थायाः मध्ये धर्मगुरुः महामहिम-दलाईलामा महोदयः गग्गल-विमानपत्तनात् तस्य मुख्य-निवासस्थानं मकलोडगञ्ज (McLeod Ganj) प्रति नीतः। तस्य आगमनेन सम्पूर्णे क्षेत्रे हर्षोल्लासस्य वातावरणं दृश्यते।

# दुविधायां भाजपा, राजस्व-हानि-अनुदानविषये स्वपक्षं स्पष्टं कर्तुं नाशक्नोत्- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुः महोदयस्य अध्यक्षतायां शुक्रवासरे सर्वदलीयगोष्ठी आयोजिता। गोष्ठ्यां १६ तमे वित्त-आयोगस्य अनुशंसासु राजस्व-हानि-अनुदानस्य (RDG) स्थगनेन प्रदेशस्य उपरि सम्भावितप्रभावाणां चर्चा विहिता। गोष्ठ्याः अनन्तरं संवादकैः सह वार्तालापकाले मुख्यमन्त्री अवदत् यत् राजस्व- हानि- अनुदानस्य प्रत्याहरणप्रस्तावः राज्यस्य कृते गम्भीरचिन्तायाः विषयः अस्ति, अनेन राज्यस्य अर्थव्यवस्थायां कुप्रभावः भवितुम् अर्हति। सः गोष्ठीं मध्यमे एव विहाय गमनार्थं भाजपा-पक्षस्य आलोचनां कृतवान्, एतत् पदं च अतीव निन्दनीयं वर्णितवान्। सः उक्तवान् यत् भाजपा अस्मिन् विषये सर्वथा गम्भीरा नास्ति, राज्यस्य जनानां हितानां रक्षां विहाय केवलं राजनीतिं करोति। विपक्षस्य नेतुः जयरामठाकुरस्य उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् न केवलं काङ्ग्रेस-पक्षः, अपितु माकपा (CPIM), आम-आदमी-पार्टी (AAP), बहुजन-समाज-पार्टी (BSP) च राजस्व- हानि- अनुदानस्य पुनरुद्धाराय प्रधानमन्त्रिणा सह मेलितुं इच्छां प्रकटितवन्तः। सः अवदत् यत् भाजपा प्रदेशस्य अधिकाराणां पक्षे स्थातुं सिद्धा नास्ति। भाजपा-नेतारः जनतायाः प्रभावेन गोष्ठ्यां सम्मिलिताः अभवन्, पुनः मध्यमे एव विहाय प्रस्थिताः।

### पूर्वतन- भाजपा- सर्वकाराय आरडीजी- रूपेण ५४,००० कोटिरूप्यकाणि लब्धानि: मुख्यमन्त्री

मुख्यमंत्री अवदत् यत् पूर्वतन-भाजपा-सर्वकाराय स्वकार्यकाले राजस्व- हानि- अनुदानरूपेण ५४,००० कोटिरूप्यकाणि तथा जीएसटी- क्षतिपूर्तिरूपेण १६,००० कोटिरूप्यकाणि लब्धानि, यदा तु वर्तमान-राज्यसर्वकाराय अधुना यावत् केवलं १७,००० कोटिरूप्यकाणि आरडीजी-रूपेण प्राप्तानि। सः अवदत् यत् पूर्णसावधानतया वित्तीयप्रबन्धनेन च प्रदेशसर्वकारः राज्यं 'आत्मनिर्भरं' निर्मातुं वेगेन अग्रे गच्छति। मुख्यमन्त्री उक्तवान् यत् अनुच्छेद २७५ (१) अन्तर्गतं राजस्व-हानि-अनुदानं राज्यानां एकः संवैधानिकाधिकारः अस्ति, यस्य उद्देश्यं राजस्व-व्यययोः अन्तरं न्यूनीकर्तुं वर्तते। एषा व्यवस्था १९५२ वर्षात् प्रचलति।

### भाजपा-पक्षस्य दृष्टि: (पक्षः) प्रदेशहिते नास्ति:-

मुख्यमंत्री सुक्खुः अवदत् यत् राज्यसर्वकारः स्वकीयाधिकाराणां कृते योद्धुं सम्यक् जानाति, परन्तु भाजपा-पक्षस्य व्यवहारः प्रदेशहिते नास्ति। एषः प्रदेशवासिनां हितानां रक्षायाः विषयः अस्ति। सः अवदत् यत् भाजपा-नेतारः दुविधायां सन्ति तथा च आरडीजी-विषये जनानां समक्षं स्वपक्षं स्पष्टतया स्थापयितुं विफलाः अभवन्। मुख्यमन्त्री उक्तवान् यत् भाजपा-नेतारः अनुभवन्ति यत् केन्द्रसर्वकारस्य एतत् पदं सम्यक् नास्ति, परन्तु तेषु पक्षं स्पष्टं कर्तुं साहसं नास्ति। सः आरोपं कृतवान् यत् भाजपा कदापि राज्यस्य जनैः सह न अतिष्ठत्। २०२३ तमस्य वर्षस्य आपदः उल्लेखं कुर्वन् सः अवदत् यत् आपदा-प्रभावितानां साहाय्यार्थं केन्द्रसर्वकारतः विशेष-आश्रयसंकुलस्य प्रस्तावः पारितः, परन्तु भाजपा-सदस्याः सर्वप्रथमं सदनात् बहिर्गमनं (वाकआउट) कृतवन्तः। प्रदेशस्य जनता भाजपायाः हिमाचल-विरोधि- व्यवहारं पश्यति, तान् च कदापि न क्षमिष्यते।

### सिङ्घा उक्तवान्- अयं समयः राजनीतेः न, हिमाचलस्य अधिकारयुद्धस्य अस्ति

आरडीजी-स्थगनविषये प्रचलन्त्यां राजनैतिक-वाक्पटुतायां माकपा नेता राकेश सिङ्घा महोदयः सर्वाणि दलानि एकीभूय योद्धुं निवेदितवान्। सः अवदत् यत् अयं समयः राजनैतिक-अङ्क-अर्जनस्य न, अपि तु हिमाचलप्रदेशस्य आर्थिक- अधिकाराणां रक्षायै सामूहिकप्रयासस्य अस्ति। सिङ्घा महोदयः अवदत् यत् आरडीजी-पुनरुद्धारः केवलं कस्यचित् एकस्य दलस्य वा सर्वकारस्य वा उत्तरदायित्वं न, अपितु सम्पूर्णस्य प्रदेशस्य सर्वेषां राजनैतिकदलानां च समान-दायित्वम् अस्ति। सः सचेतितवान् यत् यदि आरडीजी पूर्णतया समाप्ता भवेत्, तर्हि पुनः प्राप्तुं कठिनं भविष्यति। अनेन राज्यस्य वित्तीयस्थितौ गम्भीरः प्रभावः भविष्यति, येन विकासयोजनाः सामाजिकसुरक्षाकार्यक्रमाः आधारभूतसंरचनाकार्याणि च बाधितानि भवितुं शक्नुवन्ति। सः आरोपं कृतवान् यत् हिमालचेन सह निरन्तरं आर्थिक-भेदभावः क्रियते। सः उदाहरणं दत्तवान् यत् भाखड़ा ब्यास प्रबंधन बोर्ड मध्ये हिमाचलस्य ७.१ प्रतिशतं अंशः सर्वोच्चन्यायालयस्य निर्णयान्तरमपि अद्यापि न दत्तः।

### प्रदेशस्य अधिकाराणां युद्धं करिष्यामः - बलदेवः

१६ तमे वित्त- आयोगे केन्द्रसर्वकारेण हिमाचलस्य आरडीजीस्थगने आम- आदमी- पार्टी रोषं प्रकटितवती। प्रदेशसचिवः बलदेव राजः अवदत् यत् आरडीजी-स्थगनेन प्रदेशस्य प्रतिवर्षं कोटिशः हानिः भविष्यति। हिमाचलं विगत-त्रि-वर्षेभ्यः प्राकृतिक-आपदां सोढते, येन अर्थव्यवस्थायाः सहस्रशः कोटिरूप्यकाणां हानिः जाता। अस्यां स्थितौ आरडीजी-स्थगनं हिमालचेन सह कृतः महान् विश्वासघातः अस्ति। आम- आदमी- पार्टी- प्रतिनिधिः डॉ. राजेश चानना महोदयः आरडीजी-पुनरुद्धाराय पार्टी-प्रस्तावम् अपि उपस्थापितवान्। बहुजन-समाज-पार्टी प्रतिनिधिः अवदत् यत् राज्येन स्वकीयाधिकाराणां कृते मिलित्वा स्वरः समुत्थापनीयः।

# द्वाविंशति-दिनानन्तरं सर्वेषां वाहनानां कृते अटल- सुरङ्ग- रोहताङ्गमार्गः सुचारुः, हिमच्छादितासु उपत्यकासु पर्यटकाणां सम्मर्दः



**हिमसंस्कृतवार्ताः- कुल्लूः।** प्रायः द्वाविंशति (२२) दिनानां पश्चात् अटल- सुरङ्ग- रोहताङ्ग-मार्गः सर्वेषां प्रकाराणां वाहनानां कृते पुनः सुचारुः जातः अस्ति। शुक्रवासरे 'फोर बाई फोर' (4x4) वाहनैः सह सामान्यानि वाहनानि अपि अटल-कन्दरायाः 'उत्तर-द्वारं' (North Portal) तथा 'सिस्सू' क्षेत्रं प्राप्तानि। २३ जनवरी दिनाङ्के प्रबले हिमपाते सति पर्यटकाणां कृते अटल- सुरङ्ग- रोहताङ्गमार्गः पिहितः जातः आसीत्। प्रायः एकसप्ताहं यावत् पर्यटकाणां वाहनानि 'सोलङ्गनाला' पर्यन्तमेव प्रेष्यन्ते स्म। ततः अग्रे केवलं 'फोर-बाई-फोर' वाहनानामेव अनुमतिः आसीत्। शुक्रवासरे मार्गस्य सुदशां दृष्ट्वा प्रशासनेन सर्वेषां प्रकाराणां वाहनानां कृते अटल-कन्दरापर्यन्तं गन्तुम् अनुमतिः दत्ता।
प्रातःकाले एव विशालायां संख्यायां पर्यटकाः अटलकन्दरां प्राप्तवन्तः। कन्दरायाः 'दक्षिणद्वारे' 'उत्तरद्वारे' च हिमे पर्यटकाः अतीव आनन्दं प्राप्तवन्तः। यद्यपि, वाहनस्थानकस्य (Parking) अभावात् वाहनानि मार्गस्य पार्श्वे एव स्थाप्यन्ते। पर्यटनव्यवसायिनः अभिषेकः, अक्षितकुमारः, अङ्कितवर्मा च अवदन् यत् अटलकन्दरापर्यन्तं पर्यटकाणां वाहनानां गमनेन व्यवसाये वृद्धिः भविष्यतीति आशा अस्ति। कतिपय-दिनानां पश्चात् 'कोकसर' तथा 'सिस्सू' क्षेत्रेषु अपि शीतकालीनक्रीडाः अन्याः गतिविधयः च आरप्स्यन्ते। पर्यटकाः सोलङ्गनालातः अटल- सुरङ्गपर्यन्तं हिमस्य आनन्दं ग्रहीतुं शक्नुवन्ति। एसडीएम (SDM) रमण कुमार शर्मा महोदयः सूचितवान् यत् अधुना अटल-कन्दरा सर्वेषां वाहनानां कृते सुचारुं कृतमस्ति।

### मनाली-केलाङ्ग-मध्ये बस-सेवायाः परीक्षणम्, सोमवासरतः प्रचलिष्यति बस-यानम्

अपरपक्षे, हिमपातस्य कारणेन मनाली- केलाङ्ग- मध्ये स्थगितां बस-सेवां पुनः आरब्धुं निगमः प्रयत्नं प्रारब्धवान् अस्ति। अस्य कृते शुक्रवासरे निगमेन अस्मिन् मार्गे बसयानस्य परीक्षणं (Trial) विहितम्। यद्यपि, एतत् परीक्षणं पूर्णतया सफलं न जातम्। किन्तु परीक्षणकाले येषु स्थानेषु बसयानस्य आवागमने समस्या जाता, तानि स्थानानि परिष्कर्तुं (Dozing) प्रशासनेन बीआरओ (BRO) संस्थायाः कृते निर्देशाः निर्गताः। एवं सति प्रशासनं निगमश्च विश्वासं कृतवन्तौ यत् सोमवासरं यावत् मनाली-केलाङ्ग-मध्ये बस-सेवा पुनः आरब्धा भविष्यति।

# हिमाचल-प्रदेश-निवासिभ्यः उच्चतम-न्यायालयात् टिप्पणी – निजभूमौ शुष्कपतित-खदिरवृक्षाणां छेदने निषेधो नास्ति



हिमसंस्कृतवार्ताः शिमला । भारतस्य सर्वोच्चन्यायालयेन स्पष्टं कृतं यत् हिमाचल-प्रदेशे निज-भूमिषु स्थितानां शुष्कानां, पतितानां, कवक-दूषितानां, च खदिर-वृक्षाणां (Acacia catechu) छेदने कश्चन निषेधः नास्ति। मुख्यन्यायाधीशःसूर्याकान्त न्यायमूर्तिः ज्योमाल्या वागची तथा न्यायमूर्तिः विपुल.एम.पञ्चौली इत्येषां पीठेन गुरुवासरे एषा टिप्पणी कृताऽभूत्। पीठेन उक्तं यत् वर्षे १९९६ तमे संवत्सरे राज्यस्य पर्वतीय-प्रदेशेषु वृक्ष-छेदनस्य यः निषेधः आरोपितः आसीत्, सः पूर्वमेव १६-फरवरी-२०१८ तथा १०-मई-२०२३ इत्येतयोः आदेशयोः द्वारा संशोधितः अस्ति, येषु खदिरवृक्षाणां छेदनाय अनुमतिः दत्ता आसीत्। अस्मिन् प्रकरणे नियुक्तेन न्यायमित्रेण परमेश्वरेण निवेदितं यत् Himachal Pradesh High Court इत्यनेन उक्तं यत् विषयः शीर्ष-न्यायालये प्रचलति, अतः हस्तक्षेपः न कृतः। याचिकाकर्तारः आदौ जिला-वन-अधिकारिणः समीपे शुष्क-वृक्ष-छेदनस्य अनुमतिं याचितवन्तः, किन्तु अनुमतिः न लब्धा। ततो हि ते उच्च-न्यायालयं, अनन्तरं Supreme Court of India इत्यस्य शरणं गतवन्तः। पीठेन राज्य-सर्वकाराय १०-मई-२०२३ आदेशस्य पालनं कृत्वा एकां समितिं गठयितुं निर्देशः दत्तः, या एतादृश-छेदन-अनुमति-संबद्ध-प्रकरणानां निस्तारणं करिष्यति।

**खदिर-वृक्ष-छेदनं निजी-संस्थाभ्यः न दीयताम्**

उल्लेखनीयम् यत् २०१८ तमे वर्षे Supreme Court of India इत्यनेन निर्देशः दत्तः यत् खदिरवृक्षाणां छेदनं प्रत्यक्षतया वन-विभागेन अथवा हिमाचल-प्रदेश-राज्य-वन-निगमेनैव क्रियेत, न तु निजी-संस्थाभ्यः दातव्यम्। सह एव, प्रत्येक-क्षेत्रे छेदनस्य पूर्वं, मध्यकाले, अनन्तरं च दृश्यांकनम् (वीडियोग्राफी) अनिवार्यं भवेत् इति निर्दिष्टम्। न्यूनातिन्यूनं पञ्चविंशति-प्रतिशतं परिपक्व-खैर-वृक्षाः 'मदर-ट्री' इत्याख्यया संरक्षिताः स्थापनीयाः इति अपि आदेशः दत्तः।

# हिमाचलपंचायतनिर्वाचनम्-

## उच्चतम-न्यायालयस्य आदेशः-

## "31 मईतः पूर्वं सर्वथा निर्वाचनं भवेत्"




हिमसंस्कृतवार्ताः- शिमला ।हिमाचल-प्रदेशस्य पञ्चायतीराज, नगर- निकाय- निर्वाचनविषये शुक्रवासरे सर्वोच्च न्यायालयेन इत्यस्य निर्णयः प्रकाशितः। न्यायालयेन उक्तम् यत् एकत्रिंशत्- मईपूर्वं सर्वथा निर्वाचनं सम्पन्नं कर्तव्यम्। पुनः न्यायालयेन निर्दिष्टं यत् पुनर्सीमाङ्कनस्य नाम्ना संवैधानिक-संस्थानां निर्वाचनं न स्थगयितुं शक्यते। मुख्यन्यायाधीशः सूर्यकांत तथा न्यायमूर्तिः जे बी पारदीवाला इत्येतयोः खण्डपीठेन अयं निर्णयः प्रदत्तः।

## सुक्खु-सर्वकाराय एक-मासस्य अवकाशः

अस्मात् पूर्वं Himachal Pradesh High Court इत्यनेन ३० अप्रैलपूर्वं निर्वाचनं कर्तुं आदेशः दत्तः आसीत्। अधुना उच्चतम- न्यायालयेन सुक्खु-सर्वकाराय अन्यः एकः मासः अवकाशः दत्तः। विदितं यत् हिमाचल-प्रदेशे पञ्चायत- निर्वाचनविषये तीव्रः विवादः आसीत्। ३१-जनवरी-दिने पञ्चायतानां कार्यकालः समाप्तः आसीत्। उच्चन्यायालयेन ३० अप्रैलदिने निर्वाचनस्य आदेशः दत्तः, किन्तु राज्य-सर्वकारेण विशेष- अनुमति- याचिका (एल.एस.पी.) दाखिलीकृत्य सर्वोच्च न्यायालये आह्वानं कृतम्। पूर्वमेव अस्मिन् विषये श्रवणं सम्पन्नम् आसीत्, अद्य पुनः निर्णयः प्रकाशितः।

## आपदा-विषये सर्वकारस्य तर्कः



राज्य-सर्वकारेण दायर-याचिकायां उक्तं यत् प्रदेशे अतीते काले अतिवृष्ट्या तथा आपदाभिः महत् क्षतिः अभवत्। अनेकस्थानेषु पुनर्बहाली-कार्यं अद्यापि प्रवर्तते। सर्वकारेण उक्तं यत् प्रदेशे आपदा- प्रबन्धन- अधिनियमः प्रवर्तते, अतः अस्मिन् काले निर्वाचनं कर्तुं न शक्यते। तर्कः अपि प्रदत्तः यत् आपदा-प्रबन्धन-अधिनियमः संसद् निर्मितः विधानम् अस्ति, यदा पञ्चायती- राज-अधिनियमः राज्य-विधानसभया निर्मितः अस्ति; अतः संसदीय-कानूनस्य प्राधान्यम् अस्ति।

राज्यसर्वकारस्य मतं यत् उच्च-न्यायालयेन निर्धारितः कालः अपर्याप्तः अस्ति, सम्पूर्ण- निर्वाचन- प्रक्रियायाः सम्पन्नतायै अधिक-कालस्य आवश्यकता अस्ति। एतेषां सर्वेषां पक्षाणां विषये अन्तिमः निर्णयः उच्चतम-न्यायालयस्य श्रवणानन्तरं स्पष्टः अभवत्।



# अद्यतनं कलहान्वितं विश्वम्

द्वापरयुगस्य अन्तिमकाले भगवतः श्रीकृष्णस्य स्वधाम प्रति प्रयाणम् सञ्जातम्। तत्प्रयाणस्य समनन्तरं हि कलिकालस्य आरम्भः अभवत्। पुराणवर्णितस्य कलिकालस्य सम्पूर्णं लक्षणम् इदानीं प्रत्यक्षं दृश्यते। कलिशब्दस्य अर्थः कलह- युद्ध- विग्रहादिकः। कस्य केन सह कलहः इत्युक्ते शासक- शासितयोर्मध्ये, धनिक- श्रमिकयोर्मध्ये, प्राचीन- तरुणयोर्मध्ये, जाति-जात्योर्मध्ये, वर्ण- वर्णयोर्मध्ये, स्त्री-पुरुषयोर्मध्ये, स्वामि-स्त्रियोर्मध्ये, पुत्र- कन्यायोर्मध्ये, भ्रातृ-भ्रात्रोर्मध्ये, राजनेतृ- राजनेत्रोर्मध्ये, विद्वत्-विदुषोर्मध्ये, पण्डित- पण्डितयोर्मध्ये, मठाधीश-मठाधीशयोर्मध्ये, शङ्कराचार्य- शङ्कराचार्ययोर्मध्ये, गुरु-शिष्ययोर्मध्ये इत्यादिकलहः सर्वत्र व्यापकः दरीदृश्यते सम्प्रति। एवमेव शिक्षा-धर्म-समाज-सम्प्रदायादिषु सर्वत्र पारस्परिकः केवलः कलहः एव स्यात्। पुनश्च, संस्कृति- दुष्कृत्योः, प्रवृत्ति-निवृतिमार्गयोर्मध्येऽपि कलहः सुदृढः एव। एतत्तु सत्यमेव यत् चिदात्मनः पवित्रवेदिकायाः उपरि देहात्मवादस्य अथवा भोगवादस्य प्रभुत्वकारणतः कलहोऽयं सञ्जातोऽस्ति, एवं तस्य प्रतिष्ठापनं हि कलेरत्र श्रेष्ठतमः प्रभावः। धर्मे अनास्था, एवम् ईश्वरं प्रति अविश्वासः इत्येव कलेः प्रधानं वैशिष्ट्यम्। ईश्वरविषये प्रकाश्यभावेन अस्वीकारं कर्तुं सम्पूर्णं विश्वे हि मानवजातिः तत्परा। वस्तुतः धर्मः हि विश्वं धारयति, सदाचारः हि धर्मः, नैतिकता हि धर्मः, धर्मस्य सारः सत्यम्, मुक्तेः सारः च शान्तिः। अहिंसा, सत्यं, मानवतावादः, विश्वभातृत्वम् इत्यादिकः धर्मस्य महान् गुणसमूहः क्रमेण इतः विलयतां गच्छन्नस्ति, एवम् अधर्मस्य प्रकोपः शनैः मानवजातेः मध्ये प्रविश्य धर्मं ध्वस्तीकुर्वन् अवलोक्यते, यच्च धनेन क्रेतुं न शक्यते, तादृशं सुखशान्त्यादिकम् इतः विलीनतां गच्छदस्ति। प्रयुक्तिविज्ञानस्य उन्नतिः मानवस्य असीमकामनां पूरयितुम् असमर्था इति कारणतः, प्राकृतिक- सीमितसम्पदः उपरि एकस्य महतः दमनस्य प्रकोपतः च मानवः अतीष्टः सञ्जातोऽस्ति, तथा कलिग्रासे निमज्जितः दृश्यते। आध्यात्मिकस्य, वा आत्मधर्मस्य, आन्तरिकसम्बन्धस्य वा शिथिलताकारणतः मानवानां मध्ये कलहः जायमानोऽस्ति। सृष्टेरनन्तरं हि ब्रह्मदेवेन यत् यमदण्डभयं, राजदण्डभयं, पारम्परिकभयं, पारलौकिकभयं चेति भयचतुष्टयं सृष्टमासीत्, तत्प्रति मनुष्यस्य भयम् अपगतम्, अर्थाद् भयसम्बन्धे मनुष्यः उदासीनः जातः, तस्मात् वीतश्रद्धः, नास्तिकः वा भूत्वा सः शान्तिसम्प्रीत्यादिस्थाने कलहेन, सन्त्रासवादेन च समावृतः अभवत्। न केवलम् आध्यात्मिकदिशि हि तस्य अधोगतिः, अपितु आधिदैविकम्, आधिभौतिकं चेति दिग्द्वये अपि मानवः महता क्लेशेन आक्रान्तोऽस्ति। धर्मरज्जुः नितरां शैथिल्यं गतास्ति, तस्मात् कलहमरणमारणादिसम्बद्धः प्रकोपः विश्वे प्रतिक्षणं वर्धमानोऽस्ति। अस्थिरपरिवेशस्य स्थिरतार्थं यदा हिरण्यकशिपुसदृशानां जनानां वृद्धिर्जायते, तदा प्रह्लादसदृशानां जन्म भवतीति भाति, शुभम्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये त्रिदिवसीया- अखिल- भारतीय- वैदिकसंगोष्ठी






**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलवारि, असमः ।** महर्षिसान्दीपनि- राष्ट्रिय- वेदविद्या- प्रतिष्ठानम्, उज्जयिनी तथा कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालयस्य संस्कृत- वेदाध्ययन- विभागस्य संयुक्ततत्त्वावधानेन षड्विंशत्यधिक- द्विसहस्रतमवर्षस्य फरवरीमासस्य दशमे, एकादशे, द्वादशे च दिनाङ्केषु त्रिदिवसीया अखिलभारतीयवैदिकसंगोष्ठी सफलतया आयोजिता। अस्याः संगोष्ठ्याः प्रमुखविषयः आसीत्- “पूर्वोत्तरभारते वैदिकशिक्षापरम्परा”।प्रथमदिने प्रातः सार्धदशवादने उद्घाटनसत्रं सम्पन्नम्। वैदिकमङ्गलाचरणेन सत्रस्य शुभारम्भः कृतः। उद्घाटनसत्रे विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लादरा. जोशीवर्यः उद्घाटनवक्तारूपेण उपस्थितः सन् अतिथीनां स्वागतं कृत्वा संगोष्ठ्याः उद्देश्यानि प्रकाशयन् उद्घाटनभाषणम् अकरोत्।उद्घाटनानुष्ठाने मुख्यातिथिरूपेण स्वामीनारायण- शोधसंस्थानस्य (अक्षरधाम, नवदेहली) प्रमुखाचार्यः अध्यक्षः महामहोपाध्यायः साधुश्री भद्रेशदासपादः उपस्थितः आसीत्। तेन वेदाध्ययनस्य शैक्षिक- सांस्कृतिकमहत्त्वं विस्तरेण निरूपितम्। विशिष्टातिथिरूपेण कलकाताविश्वविद्यालयस्य आचार्यः रवीन्द्रनाथभट्टाचार्यमहाभागः उपस्थितः आसीत्। बीजवक्तारूपेण गौहाटीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः कामेश्वरशुक्लमहाभागः पूर्वोत्तरभारते वैदिक- शिक्षापरम्परायाः ऐतिहासिक- शास्त्रीयपरिप्रेक्ष्यं व्याख्यानम् अकरोत्। अस्मिन् सत्रे विश्वविद्यालयस्य वेदवेदाङ्गसंकायाध्यक्षः आचार्यः सुधाकरमिश्रवर्यः अपि उपस्थितः आसीत्। सत्रस्य अन्ते संगोष्ठ्याः संयोजकः तथा संस्कृतवेदाध्ययनविभागस्य सहायकाचार्यः डॉ. प्रणवज्योति डेका धन्यवादज्ञापनम् अकरोत्। सभासञ्चालनं संस्कृत- वेदाध्ययनविभागस्य सहायकाचार्येण महेशचिदाम्बरभट्टेन दक्षतया निर्वाहितम्। अस्मिन्नवसरे संगोष्ठ्याः समन्वयिका डॉ. बर्णाली बरठाकुर, सहसंयोजिका डॉ. सानु सिन्हा, विभिन्नविभागाध्यक्षाः, अध्यापकवृन्दम्, महर्षिसान्दीपनि- राष्ट्रियवेदविद्याप्रतिष्ठानस्य प्रतिनिधयः, शोधच्छात्राः तथा छात्राः बहुसंख्यया उपस्थिताः आसन्।

उद्घाटनसत्रानन्तरं प्रथमं शैक्षणिकसत्रं पादोन एकवादने आयोजितम्, यस्य अध्यक्षता आचार्या मौदासगुप्तामहाभागा अकरोत्। अस्मिन् सत्रे चत्वारः शोधपत्रप्रस्तोतारः स्वविषयान् प्रस्तुतवन्तः। अपराह्णे त्रिवादने द्वितीयसत्रं सम्पन्नम्, यस्य अध्यक्षता सहाचार्यः विश्वबन्धुमहोदयः अकरोत्, तत्र त्रयः पत्रप्रस्तोतारः सहभागिनः आसन्। द्वितीयदिने आयोजितेषु सत्रेषु क्रमशः आचार्यः तारकनाथअधिकारीवर्यः, डॉ. सुमन के. एस., आचार्यः देवराजपाणिग्रहीमहोदयः अध्यक्षतां निर्वहन्तः शोधपत्रप्रस्तुतिं मार्गदर्शितवन्तः। प्रत्येकसत्रे विद्वद्भिः पूर्वोत्तरभारते वैदिकशिक्षा- परम्परामधिकृत्य बहु चर्चा कृता आसीत्।

तृतीयदिने अस्याः संगोष्ठ्याः अन्तिमे सत्रे अपि आचार्यः देवराजपाणिग्रहीमहोदयः अध्यक्षतां कृतवान्। सत्रेषु विविधराज्येभ्यः आगतैः विद्वद्भिः शोधपत्राणि प्रस्तुतानि, येषु वैदिकपरम्परायाः बहुविधा आयामाः प्रकाशिता अभवन्।संगोष्ठ्याः समापनसत्रं मध्याह्ने द्विवादने सम्पादितम्। अस्मिन् समापनसत्रे मुख्यातिथिरूपेणासीत् गौहाटीविश्वविद्यालयस्य प्राक्तनसंस्कृतविभागाध्यक्षा आचार्या सुदेष्णा भट्टाचार्यः। विशिष्टातिथिरूपेणासीत् गोवाहाटी- विश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः जगदीश शर्मा। समापनसत्रस्य अन्ते संगोष्ठ्याः संयोजकः डॉ. प्रणवज्योति डेका, समन्वयिका डॉ. बर्णाली बरठाकुर, सहसंयोजिका डॉ. सानु सिन्हा सर्वेषां धन्यवादज्ञापनम् अकुर्वन्।

# वेदेषु खगोलीयज्ञानम् अनुप्रयोगश्च इति विषयोपरि-त्रिदिवसीया- अखिलभारतीयवैदिकसङ्गोष्ठयाः आयोजनम् वेदेषु सूर्यः ‘नित्यज्योतिः’ – प्रो. मनोज मिश्रः



**हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः।** गतगुरुवासरे उज्जयिनीस्थ महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः तथा च महर्षिसान्दीपनिराष्ट्रिय- वेदविद्याप्रतिष्ठानम् इत्यनयोः संयुक्ततत्त्वावधाने त्रिदिवसीया अखिलभारतीयवैदिकसंगोष्ठ्याः आयोजनं कृतम् । सङ्गोष्ठ्यां खगोलज्ञानस्य वैदिकज्ञानस्य च सङ्गमस्य दृष्टिगोचरः अभवत्। वेदेषु खगोलीयज्ञानम् अनुप्रयोगश्च इति विषयमुररीकृत्य सङ्गोष्ठयाः आयोजनं जातम्। दिनत्रयं पर्यन्तं जायमानायाः अस्याः सङ्गोष्ठ्याः सम्पूर्तिसत्रे मुख्यातिथिरूपेण उपस्थिताः अमलतासविश्वविद्यालयस्य माननीयः कुलगुरुः प्रो शरदचन्द्रवानखेड़े महोदयः, सारस्वतातिथिः कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य प्राचीनभारतीयविज्ञानमानविकी इत्यस्य संकायाध्यक्षः प्रो.कृष्णकुमारपाण्डेयः, विशिष्टातिथिः केन्द्रियसंस्कृतविश्वविद्यालयस्य प्रयागराजस्थ गङ्गानाथझापरिसरस्य वेदविभागाध्यक्षः प्रो.मनोजमिश्रः उपस्थिताः आसन्। आचार्यमनोजमिश्रवर्यः स्वीयव्याख्याने उक्तवान् यत् सूर्यस्य उदयः अस्तं गमनं च वस्तुतः दृश्यभ्रममात्रम् अस्ति। सः स्पष्टतया अवदत् यत् सूर्यः स्थिरः अस्ति, पृथ्वी तु स्वस्थाने परितः निरन्तरं भ्रमति। अस्यैव घूर्णनक्रियायाः कारणेन पृथिव्याः विभिन्नभागेषु दिनरात्र्योः परिवर्तनं भवति, येन अस्माभिः सूर्योदयः सूर्यास्तश्च अनुभूयते। सःउक्तवान् यत् “वयं प्रतिदिनं वदामः यत् सूर्योदयः सूर्यास्तं च भवति, किन्तु तस्य कारणं पृथिव्याः गतिः अस्ति, परिवर्तते अस्माकं स्थितिः, न तु सूर्यस्य ।” प्रो. मिश्रः वैदिकसाहित्यस्य उल्लेखं कृत्वा अवदत् यत् वेदेषु सूर्यः ‘नित्यज्योतिः’ तथा च ‘साक्षी’ इत्युच्यते, यत् अस्य निरन्तरप्रकाशमानत्वं सूचयति। सः विद्यार्थिनः शोधार्थिनश्च प्रति आह्वानं कृतवान् यत् ते वैदिकमन्त्राणां आधुनिकखगोलविज्ञानस्य च मध्ये सम्वादं स्थापयन्तु। मुख्यातिथिः देवासजनपदस्थ अमलतासविश्वविद्यालयस्य माननीयः कुलगुरुः प्रो शरदचन्द्रवानखेड़े महोदयेन ज्योतिषं वैदिकञ्च विषयानधिकृत्याधुनिकसन्दर्भे कार्यं कर्तुं अनुबन्धस्य प्रस्तावः प्रस्तवितम्। महोदयेनोक्तं यत् प्राचीनाधुनिकविज्ञनयोः संयोगेन नैकानिशोधकार्याणि भवितुं शक्यते, तदर्थं वयं मिलित्वा कार्यं कर्तुं समर्थाः। सारस्वत- उद्बोधने प्रो.कृष्णकुमारपाण्डेयमहोदयेनोक्तं यत् ज्योतिषं वेदाङ्गः अतः ज्योतिषशास्त्रस्य प्राचीनता सिद्धाऽस्ति। ज्योतिषं वेदेषुनिर्दिष्टवचनानामङ्गीकृत्य कार्यं करोति। तेनोक्तं यत् वेदस्य प्रमुखोद्देश्यः इष्टप्राप्त्यनिष्टपरिहार्यं च अस्ति। इष्टप्राप्त्यर्थं यज्ञानां सम्पादनं वेदेषु निर्दिष्टम्। तान् यज्ञान् सम्पादयितुं ज्योतिषं कालविधानं करोति। ज्योतिषं विना यज्ञानामाचरणं नैव सिद्ध्यति। लोकल्याणभावनायाः इयं सङ्गोष्ठी साफल्यं प्राप्तवती । सङ्गोष्ठ्याः अध्यक्षः माननीयः कुलगुरुः प्रो.शिवशङ्करमिश्रः वैदिकसाहित्ये वर्णितं कालतत्त्वस्य विवेचनं कृतम्। तैः उक्तं यत् भारतीयज्ञानपरम्परायां कालः केवलं गणनायाः विषयः नैव अपितु ब्रह्माण्डीयव्यवस्थायाः आधारः मन्यते। सः पुनरुक्तवान् **वेदेषु वेदाङ्गज्योतिषे कालस्य सूक्ष्मतमैककात् आरभ्य युग-कल्प-महाकल्पपर्यन्तं विस्तृतं वर्णनमस्ति तथा च मानवचिन्तनस्य अद्भुतवैज्ञानिकदार्शनिकौन्नत्याः परिचायकम्** अस्ति।विश्वविद्यालयस्य कुलसचिवः प्रो. दिलीपः सोनी उक्तवान् यत् एषः त्रिदिवसीयराष्ट्रीयवैदिकमन्थनकार्यक्रमः स्पष्टतया दर्शितवान् यत् वेदानां विज्ञानं कालदर्शनं च अद्यापि वैश्विकबौद्धिकविमर्शे नूतनदिशां दातुं समर्थमस्ति। कार्यक्रमस्य सञ्चालनं वास्तुशास्त्र विभागस्य प्राध्यापकः डॉ.विजयकुमारः अकरोत्, आभारप्रदर्शनञ्च ज्योतिषविभागाध्यक्षः डॉ.उपेन्द्रभार्गवः कृतवान्।

# सरोजिनीनायडूमहोदयायाः व्यक्तित्वं कृतित्वं च

## (जयंतीविशेषः)






डॉ. विमलेश झा,, डीएवी पब्लिक विद्यालयः बरारी भागलपुर बिहार

भारतीयस्वातन्त्रतासंग्रामस्य इतिहासे अनेकाः तेजस्विन्यः नार्यः स्वजीवनं राष्ट्रसेवायै समर्पितवत्यः। तासु सरोजिनी नायडूमहोदयायाः स्थानं विशिष्टतमम् अस्ति। एषा न केवलं स्वतन्त्रतासेनानिनी, अपि तु कवयित्री,कुशला वक्त्री, नारीशक्तेः प्रतीका च आसीत्। एतस्याः व्यक्तित्वे काव्य-सौन्दर्यं, राष्ट्रभक्ति, मानवतावादः, स्त्रीस्वातन्त्र्यचिन्तनं च अद्भुतरूपेण समन्वितम् आसीत्। अत एव एषा "भारतस्य कोकिला" इति नाम्ना विख्याता अभवत्। एतस्याः जन्म 1879तमे वर्षे फरवरीमासस्य त्रयोदशदिनांके हैदराबादनगरे प्रतिष्ठितबङ्गालीपरिवारे अभवत्। एतस्याः पिता अघोरनाथ चट्टोपाध्यायः विद्वान् शिक्षाशास्त्रज्ञः आसीत्, माता वरदसुन्दरी देवी संस्कृतभाषायाः कवितारचनायां निपुणा आसीत्। एतादृशे विद्वत्पूर्णे वातावरणे बाल्यादेव एतस्याः साहित्यरुचिः उत्पन्ना जाता। एषा अल्पवयसि एव असाधारणमेधाविनी आसीत्। द्वादशवर्षे वयसि एव विश्वविद्यालय- प्रवेशपरीक्षायां सफलता लब्धा। तदनन्तरं इंग्लैण्डदेशं गत्वा किंग्समहाविद्यालय- लन्दननगरे उच्चशिक्षां प्राप्तवती। पाश्चात्यसाहित्यस्य अध्ययनं कृत्वापि एषा स्वदेशीयसंस्कृतिं कदापि न विस्मृतवती। सरोजिनीनायडूमहोदया जन्मना कवयित्री आसीत्। एतस्याः कवितासु प्रकृतिसौन्दर्यं, मानवीयभावनाः, प्रेम, करुणा, राष्ट्रभक्तिं च सरसतया प्राप्यन्ते। एतस्याः भाषा सरला, मधुरा, गीतात्मिका च आसीत्। एषा असाधारणवक्त्री आसीत्। एतस्याः भाषणेषु जनमानसं प्रेरितुं क्षमता आसीत्। स्वतन्त्रता- संग्रामकाले एषा प्रतिग्रामं, प्रतिनगरं गत्वा जनान् जागरूकम् अकरोत्। एतस्याः सम्पूर्णजीवनं राष्ट्रसेवायै समर्पितम् आसीत्। महात्मागांधीत्यस्य नेतृत्वे एषा असहयोग- आन्दोलनं, सविनय- अवज्ञा- आन्दोलनं च सक्रियतया समर्थितवती। सरोजिनी नायडू नारीस्वातन्त्र्यस्य प्रखरसमर्थिका आसीत्। एषा स्त्रीशिक्षां, स्त्रीसमानतां, सामाजिकसम्मानं च आवश्यकम् इति सदा प्रतिपादितवती।

सरोजिनीनायडूमहोदया उर्दू- तेलुगु- आङ्ग्ल- बाङ्गला- फारसीभाषासु निपुणा आसीत्। नायडूमहोदयायाः साहित्यिकं योगदानं विशेषतः देशभक्तेः, प्रेमभावनायाः तथा गीतात्मकविषयाणां प्रति केन्द्रितम् आसीत्। एतस्याः कविताभ्यः महात्मना गान्धिमहोदयेन एषा "भारतस्य कोकिला" इति सम्बोधिता। एतस्याः जन्मदिनं भारतदेशे "राष्ट्रीय- महिलादिवसः" इति रूपेण आचर्यते। सरोजिनीनायडूमहोदया मुख्यतया आङ्ग्लभाषायां काव्यरचनां कृतवती। तथापि एतस्याः कवितासु भारतीयता स्पष्टतया दृश्यते। एतस्याः प्रमुखकाव्यसंग्रहाः सन्ति- "द गोल्डन थ्रेशहोल्ड" "द वर्ड आफ टाइम" "द ब्रोकेड विंग" इति।"लेडी आप द लेक" "मेहर मुनीर" एते द्वे रचने नायडूमहोदयायाः स्तः। अपि च एतस्याः हिन्दीभाषायां बहव्यः रचनाः सन्ति। एतेषु काव्येषु भारतीयनारीणां जीवनं, ग्राम्य-संस्कृतिः, प्रकृति-सौन्दर्यम्, आध्यात्मिकभावना च चित्रितानि सन्ति। एतस्याः महोदयायाः स्वातन्त्र्यसंग्रामे अपि योगदानम् अद्वितीयम् आसीत्। एषा भारतीय- राष्ट्रीय- काङ्ग्रेस संस्थायाः प्रमुखा नेत्री आसीत्। एषा 1925 तमे वर्षे कांग्रेससंस्थायाः अध्यक्षपदे नियुक्ता अभवत्। एषा भारतीयराजनीतौ स्त्रीणां नेतृत्वस्य ऐतिहासिकक्षणः आसीत्। एषा अनेकवारं कारावासं प्राप्तवती, तथापि कदापि विचलिता नाभवत्। ऐसा महात्मा गांधीजीत्यस्य विश्वासपात्रा सहचरी इति नाम्ना विख्याता अभवत्।

स्वातन्त्र्योत्तरकाले सरोजिनीनायडूमहोदया उत्तरप्रदेशराज्यस्य प्रथमराज्यपालः अभवत्। एषा नियुक्तिः भारतीयनारीणां प्रशासनिकक्षेत्रे प्रवेशस्य प्रतीकः आसीत्। सरोजिनीमहोदया मानवतावादिनी आसीत्। एषा कदापि जातिभेदं, धर्मभेदं, लिङ्गभेदं च न स्वीकृतवती। एतस्याः चिन्तने "वसुधैव कुटुम्बकम्" इति भारतीयदर्शनस्य प्रभावः स्पष्टः दृश्यते। सरोजिनीनायडूमहोदया 1949 तमे वर्षे मार्चमासस्य द्वितीयदिनांके लखनऊनगरे देहत्यागं कृतवती। एतस्याः निधनं सम्पूर्णराष्ट्राय अपूरणीया क्षतिः आसीत्। अद्यापि जनाः एतां भारतीयनारीशक्तेः, साहित्यस्य, राष्ट्रभक्तेः च विशिष्टम् उदाहरणरूपेण जानन्ति। सरोजिनीनायडूमहोदया बहुमुखीव्यक्तित्वस्य स्वामिनी आसीत्। एतस्याः जीवनं दर्शयति यत् साहित्यं राष्ट्रसेवायाः साधनं भवितुं शक्नोति। भारतसर्वकारेण 1964 तमे वर्षे एतस्याः नाम्ना एकस्याः डाकचिटिकायाः उद्घाटनं कृतम्। एषा सम्पूर्णं जीवनं स्वराष्ट्रस्य कृते समर्पितवती। अत एव एषा न केवलं इतिहासस्य विशिष्टं पात्रम् अस्ति, अपि तु भारतीयचेतनायाः विशिष्टा प्रेरणा अस्ति।

# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। आदौ केरलराज्यस्य वार्ता श्रूयताम्। कोझिकोड-नगरे एकया वृद्धया महिलया पदमार्गे द्विचक्रिका अवरुद्धा। तया चालकः तर्जितः। सा वीरा इति जनैः उक्तम्।

**नन्दिनी-** एतत् तु उत्तमं वृत्तम्। परन्तु इटली-देशे क्रीडालवः दुःखिताः। मिलान-नगरस्य हिमक्रीडासु जितानि सुवर्ण-पदकानि भग्नानि।

**काव्या-** अहो कष्टम्! अन्यदपि शृणु। आयरल्याण्ड-देशे पक्षिभिः विद्युत् अवरुद्धा। काष्ठकूटैः स्तम्भेषु रन्ध्राणि कृतानि।

**नन्दिनी-** पक्षिणः अपि शक्तिमन्तः! अन्ते जापान-देशस्य वार्ता। तत्र अति-पर्यटनं जातम्। अतः नगराध्यक्षेण पुष्पोत्सवः निरस्तः।

**काव्या-** अद्य एतावदेव। श्वः पुनः मिलिष्यावः। नमो नमः।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

# "प्रेम्णः मधुरता"

प्रातःकाले स्नात्वा प्रथमं त्वं किं करोषि? अकस्मात् सा माम् अपृच्छत्। अहम् उत्तरं दत्तवान्- प्रथमम् अहं ईश्वरस्य समक्षं दीपं प्रज्वालयामि। सा अपृच्छत्- 'किमर्थम्?' अस्माकं गृहे विद्युत् अस्ति। इदानीं स्वच्छसूर्यप्रकाशोऽपि अस्ति तर्हि ईश्वरस्य समीपे पृथक् दीपः किमर्थम्? मम समीपे अस्य प्रश्नस्य उत्तरं नासीत्।

किञ्चित् चिन्तयित्वा अहम् अवदम्- "यदा अहम् ईश्वरस्य पुरतः स्थितः सन् दीपं प्रज्वालयामि नीराजनं च करोमि तदा मम मनश्शान्तिं लभते"। सा अग्रे अवदत्- इदानीम् अहं यत्किमपि वदामि तत्प्रायः विसङ्गतिपूर्णम् इति त्वं चिन्तयसि किन्तु सम्यक् अवबोधयतु। प्रत्येकं मनुष्यस्य प्रकृतिर्भिन्ना भिन्ना। वयं यदा कञ्चित् मनुष्यं पश्यामः तदा तस्याऽऽचरणं दृष्ट्वा मनसि किमपि अनुमानं कुर्मः। कश्चन् जनः अस्मभ्यं तत्क्षणमेव रोचते कश्चन च दीर्घकालिकसाहचर्येणापि आकर्षणात् परे भवति प्रत्येकं जनस्य मनः एकम् अद्भुतं रसायनम् अस्ति। केवलं सौन्दर्यं प्रेम्णः कृते पर्याप्तं नास्ति। सौन्दर्यपूर्णः व्यक्तिः यदि दुराग्रही, अहङ्कारी, आत्मश्लाघायुक्तः अस्ति तर्हि अस्य जनस्य साहचर्यं कालान्तरेण जामितापूर्णं निरुत्साहपूर्णञ्च भविष्यति। अन्ततः वयं मनुष्यस्य स्वभावेन सह तिष्ठामः शरीरं तु केवलं निमित्तमात्रम्। यदि मनुष्यस्य स्वभावे मृदुता,विनयशीलता, शालीनता च सन्ति तर्हि तस्य साहचर्यम् अतीवमोदकरम् आनंददायकञ्च भासते। त्वं वदसि यदा ईश्वरस्य पुरतः दीपं ज्वालयामि तदा मनः शान्तं भवति। गृहे विद्युद्दीपाः सन्ति तर्हि नीराजनात् [घृतादियुक्तात्] प्रसृतः सात्त्विकः प्रकाशः अस्मान् मोदयति। व्यक्तेः साहचर्योऽपि तथैव। कस्यचित् सौंदर्यं अल्पकालपर्यन्तं दीप्यते? सौन्दर्यं कतिचननिमिषाणां क्रीड़ाऽस्ति। किन्तु सत्यम् एतत् अस्ति किम् आत्मिकसन्तुष्टिः केवलं देवदीपस्य लघुतेजसा एव लभते। आयुषिऽपि नैके जनाः आगच्छन्ति गच्छन्ति च। केचन जनाः युष्मान् दीपयन्ति, केचन युष्माकं जीवनस्य अन्धकारं दर्शयन्ति। एतेषु सर्वेषु ऋतं प्रेम देवदीपस्य ज्योतिः सदृशं तिष्ठति। नीरवतया प्रज्वलति, मनश्शान्तिं च दास्यति। जगति किमपि शाश्वतं निरन्तरं च नास्ति। किन्तु सात्त्विकं प्रेम निरन्तरम् अस्माभिः सह वर्तते तथा च जीवनं उत्साहपूर्णं करोति। प्रेमविश्वासयोः आधारितः सम्बन्धः चिरस्थायी भविष्यति। व्यवहारस्य नीतिनियमाः यदा प्रेम्णः कृते युज्यन्ते तस्मादेव क्षणात् तस्य सम्बन्धस्य पराभवः निश्चितरूपेण भवति। तमसा आवृत्ते प्रकोष्ठे यदा दीपं प्रज्वाल्यते तदा दशसु दिक्षु प्रकाशो भवति तथैव ऋतं प्रेम अपि युष्माभिः सह सदैव तिष्ठति। प्रेम भक्त्याऽपररूपमेव। प्रेम्णि आर्तता अस्ति किन्तु याचना नास्ति। अस्मान् परितः विद्युत्प्रकाशः अस्ति तर्हि वयं देवदीपस्य तेजः नमस्कुर्मः। अस्य किं कारणम्? देवदीपस्य तेजः सात्त्विकम् आत्मीयतापूर्णञ्च अस्ति। एतादृशं निष्पापं, पवित्रं, भावनापूर्णं प्रेम जीवने अमूल्यनिधिरस्ति इति मे चिन्तनम्। किन्तु अद्यत्वे ईदृशं प्रेम अशक्यमेव इति अहं जानामि। अद्य प्रेम्णः भिन्नाः व्याख्याः अहं श्रुतवती। अहं प्रसन्नो भूत्वा हसितवान्।

